M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 1163

Title: Shiva Nama Sar Sangraha

1163

શિવનામસ્તાર સંગ્રહ

श्रीगणेशाय नमः। प्रणम्य परमात्मानं पार्वतीपतिमीश्वरं। कुर्वे तन्नाममाहात्म्यसंग्रहं भुक्तिमुक्तिदं॥ केदार
खंडे। द्व्यक्षरं नाम येषां वै जिह्वाग्रे संस्थितं सदा। ते वै मनुष्यरूपेण रुद्रा नास्त्यत्र संशयः २ शिवेति द्व्यक्षरं ना
म त्रायते महतो भयात्। तस्माच्छिवश्शिवेत्येतान्नाम येतां यदि जन्मनाम ३ किं तु वै बहुनोक्तेन शिवद्व्यक्षरद्वयं। उ
च्चारयंति ये नित्यं ते रुद्रा नात्र संशयः ४ शिवेति द्व्यक्षरं नाम व्याहरिष्यंति ये नराः। तेषां स्वर्गश्च मोक्षश्च भविष्य
ति न चान्यथा ५ शिवद्व्यक्षरं नाम महापापप्रणाशनं। येषां मुखाद्गतं नृणां ते रियं धार्यते मही ६ शिवेति द्व्यक्ष
रं नाम ये रुद्री रितमुत्सुकैः। ते धन्यास्ते कृतात्मानः कृतकृत्यास्त एव च ७ हत्वा भित्वा च भूतानि भुक्त्वा चान्यायतो
पि वा। शिवमेकं सकृज्जप्त्वा सर्वैः पापैः प्रमुच्यते ८ वासिष्ठे॥ त्वदनुस्मृतिकल्याणवतामिह महेश्वर। न वक्किं
चन दुष्प्रापं न च काश्चन भीतयः ९ ते देशास्ते जनपदास्ता दिशस्ते च पर्वताः। त्वदनुस्मरणोपात्तधियो यत्र स्थि
ता जनाः १० फलमेतस्य पुण्यस्य वर्तमानस्य सेवनं। ततो विशेषतेह्यीजं त्वदनुस्मरणं विभो ११ ज्ञानामृते
क कलशो द्युतिज्योत्स्ना निशाकरः। अपवर्गपुरद्वारं त्वदनुस्मरणं विभो १२ त्वदनुस्मरणोदारचिंतामणिव
ता मया। सर्वासामापदां मूर्ध्नि दत्तं भ्रतपतं पदं १३ जाबालश्रुतिः। अपि वा यश्चांडालः शिवइति वा व
शि देत्तेन सह संवदेत्तेन सह भुंजीत॥ ॥वासिष्ठे॥ शिवेति वाचं यो नित्यं चांडालोपि वदेत्सदा। सह तेन वदे १
द्वा च सह तेन वसेत्सदा १४ भागवते यद्व्यक्षरं नाम गिरेरितं नृणां सकृत्प्रसंगादघमाशु हंति तत्। पवि
त्रकीर्तिमलंघ्यशासनं भवानहो द्वेष्टि शिवं शिवेतरः १५ शंकरसंहितायां। कुर्वंति ह्येव मर्त्याः शि

वनामामृतं परं। ज्ञानतो ज्ञानतो वापि नास्ति तेषामघं ध्रुवं १६ यश्चातुर्वेदविद्विप्रः शिवशब्दविवर्जितः। तेन संभा
षणं नित्यं न कार्यं मोहतोपि वा १७ ब्रह्मोत्तरखंडे अहो यदेषा शिवनाम नारी प्रमादतो वाप्यसती जगाद। तेनैव भूयः
सुकृतेन शंभोर्बिल्वांकुराराधनपुण्यमाप १८ महापातकविच्छित्त्यै शिवइत्यक्षरद्वयं। अलं नमस्क्रियायुक्तो
मुक्तये वकथितो मनुः १९ काशीखंडे शिवनामश्रवणात् मर्दीयमपि पातकं। मंदीभूतं ततस्तेन प्रवेशं लब्धवान्
ह २० नित्यं विश्वेश विश्वेश विश्वनाथेति यो जपेत्। त्रिसंध्यं तं सुकृतिनं त्यक्ष्यत्यहमपि ध्रुवं २१ विष्णुस्तवनं कृत्वापि
सुमहत्पापं त्वां यः स्मरति भावतः। आधारं जगतामीश तस्य पापं विलीयते २२ तव नामानुरक्ता वाक् पुंसो यस्य
जगत्पते। अप्यद्रिकूटतुलितमेनस्तन्न न बाधते २३ यदि जातु विदंधकद्विषस्तव नामोष्ठपुटाद्विनिःसृतं। शि
व शंकर चंद्रशेखरेत्यसकृत्तस्य न संसृतिः पुनः २४ शैवे उक्तं शिवेति येः पुण्यं यद्वा हर हरेति वा। न ते द्रक्ष्यंति
नरकं न यमं द्विजसत्तम २५ महादेव महादेव महादेवेति यो वदेत्। एकेनैव तु मुक्तिः स्याद्द्वाभ्यां शंभुर्ऋणी भवेत् २६
आदित्यपुराणे स्त्रीशूद्रपुत्रकवचनं इदं पुण्यमिति ज्ञात्वा कृतं नानेन यद्यपि। आहर प्रहरेत्यादि नाम संकीर्तनं
सदा। करोति तेन पुण्येन तदघं भस्मसात्कृतं। पापलेशो न तस्यास्ति इति मे निश्चिता मतिः २८ तत्रैव सुद्युम्न
वचनं जानाति को महेशस्य माहात्म्यं परमात्मनः। यस्य नाम्नः फलमिदं अज्ञानोच्चारणादपि २९ ज्ञात्वा यः कीर्त
येच्छंभोर्नामान्यमितेजसः। मुक्तिः करतले तस्यास्थिता इति मुनयो जगुः ३० ब्रह्महा वा सुरापी वा स्तेयी वा गुरुतल्पगः
अंतकाले शिवं स्मृत्वा शिवसायुज्यमाप्नुयात् ३१ प्रसंगात्कौतुकाल्लोभाद्भयादज्ञानतोपि वा। हर इत्युच्चरन्मर्त्यः
सर्वपापैः प्रमुच्यते ३२ ये स्मरंति महादेवं यदि पापरता अपि। ते विज्ञेया महात्मान इति सत्यं वदाम्यहं ३३ पद्मपुरा

णेपातकरं वंदे। मन्नाम रुद्राक्षविभूतिधारिणो ममाग्रतो यस्तु पुराणवक्ता। सर्वेषु पापेष्वपि तेषु सत्सु प्रशाम्यतां
नैव यमाधिकारः ३४ सा जिह्वा या शिवं स्तौति तच्चित्तं यत्तदर्पितं। तावेव कर्णौ श्लाघ्यौ यौ तत्कथाकर्णकौ ३५ सुज
२ न्मदेहमस्यर्थं तदेवाशेषजन्मसु। यस्तु पुल्कसो ऽपि हर नामानुकीर्तनात् ३६ अत्युत्तमाय पदेशं भोर्मुक्तेः पातितरखादति।
स्वमांसमत्र मस्थीनि मुक्तेः पातितरखादति ३७ शिवेति मंगलं नाम यस्य वाचि प्रवर्तते। भस्मीभवंति तस्याशु महापातककू
कोटयः ३८ शिवगीतायां अन्यानि शिवकर्माणि करोतु न करोतु वा। शिवनाम जपेद्यस्तु सर्वदा मुक्त एव सः ३९ ई
शानसंहितायां यन्नामकीर्तनात्सद्यः पतितोऽपि विशुध्यति। किं पुनस्तो महात्मानस्तद्भक्तिसमन्विताः ४०। शिव शंक
र विश्वेश महादेवांबिकापते। हर शंभो विरूपाक्ष मां पाहि विश्ववल्लभ ॥ प्रसंगदथवालोभाद्दीरयंति य एव नाः। पाप
त्रापां करं मंत्रं ते मांति नयमांतिकं ४२ सूतसंहितायां महादेवेति यो ब्रूयात्सततं रुत्थाय निस्पृशः। जन्मांतरस
हस्रेषु कृतं पापं विनश्यति ४३ आदित्यपुराणे नाम्नापि कल्पषच्छेदः स्मरणादेव बुध्यते। पूजनाद्यस्य निर्वाणं
तमीशं कोनसंश्रयेत् ४४ शाठ्येनापि नरा नित्यं ये स्मरंति महेश्वरं। तेपि यांति तत्तुल्यत्वं का शिवलोकमनामये ४५
शो वंते ते परं दीना अभाग्याश्च दिने दिने। प्रमादेनापि ये नोक्तं शिवइत्यक्षरद्वयं ४६ ज्ञानाज्ञानप्रयुक्तानां पापा
नां महतामपि। एकां तनिष्कृतिः शंभोः सकृदेव हि कीर्तनं ४७ आहरप्रहरसंहरेति वा व्याहरन्सकृदघैः प्रमुच्यते
। मोक्षये त्वमकृति कामकमंतो नामकीर्तनमुमापतेः सदा ४८ परमं खलु कर्म भूषणं शिवनामस्मरणं मनोहरं।
तदपारसुखावहं सदा न कृतं येन स यातियातनां ४९ कदा गंगातीरे हरहर महादेव भगवन्महारुद्रेशान स्मर हर
हराद्यांधकरिपो। उमाकांत ध्यात्वा सकटितजया रूढ भगवन्निति त्येष्येगं वाक्यमपि करोमि प्रसन्नमनः ५० नमः

वायेति सकृज्जपितापापं महाघोरमुपैति नाशं। अस्य निशि क्षात्सरिपूर्णकक्षं स्वल्पाग्निनादग्धमुपैति नाशं ५१ र
सने रवि नो यमं जलिरस्ते परनिंदापरुषैरलं वचोभिः। नरकापहरं नमः शिवायेत्यमुमादि प्रणवं भजस्व मंत्रं ५२ महा
देवेति वक्तारं दृष्ट्वैव यमकिंकराः। पलायंते महाभीताः स्मरंतो यमशासनं ५३ कोटयो ब्रह्महत्यानामगम्यागमको
टयः। सद्यः प्रलयमायांति महादेवेति कीर्तनात् ५४ महादेवेति कल्याणी वाणी यस्य मुखांबुजे। स धन्यः स्याद्वय
त्यन्यान्स्वर्ग दर्शि पथगो नरा न ५५। महादेवेति वाग्वल्ली चतुरक्षरपल्लवा। भक्तिसिक्ता फलत्येकानतुर्वर्गफलान्यहो
५६ महादेव महादेव महादेवेत्ययं ध्वनिः। सुधियां मुक्तिकांतायाः पाणिग्रहणदुंदुभिः ५७ महादेव महा॰ध्वनिः।
मोक्षलक्ष्मीगृहद्वारकपाटोद्घाटनध्वनिः ५८ अल्लवेवर्त्ते ॥ हृदयकमलमध्ये शब्दजालैकसारो निवसति
भुवियेषां श्री महादेवशब्दः। क्षणमपि सकलार्थज्ञानमोक्षप्रदायी भवति हि सुधियोते सत्यमेवानवद्यो। ५९
शब्दाः संति सहस्रशः फललुप्त फलदा मंत्राः पराः कोटयो नामैकं प्रवरं वदंत्यतितरां तेभ्यो न वद्यं हरेः। विष्णोर्नाम
सहस्रतः शिवपरा वाणीवतासां करं नामैकं त्रिपुरांतकस्य मननादिस्वार्थसिद्ध्यै सकृत ६० एकं नाम शिवस्य
जातु कृथयन्नष्टेणवन्नतथाल्येक्षणेरुद्रत्वं समुपैति नैष्यति पुनर्मातुश्च गर्भेश्वरणं। पापैर्जन्मशतार्जितैरपितरामुक्तो
मुखं भैरवं नावेक्षे यमकिंकरस्य सहसा रौद्रं गलोः संवृतः ६१ नामोच्चैः प्रवरं शिवस्य कथनं संवर्धयेत्सर्वथा यः श्रो
तुः श्रवणं प्रविश्य सहसा संसारबंधं हरेत्। उत्तरत्र्यापि तपोव्रतं हृदि शिवं ध्यायन्सदा कीर्तयेद्विश्वेशत्रिपुरांतकेश्व
र शिवेत्याधायमर्थं जानकिं ६२ रुद्राक्षस्य न धारयो सिनम रेश्रोता न्निरिडभस्मनि मुश्चदारुदजपार्निशि नकथा स्तो

त्रेषु पंचाक्षरे । नित्यं शंकरपादयोरपि सदा लिंगार्चने जायते पुण्यैर्जन्मशतार्जितैरविकलैर्वा सर्वपुण्यस्थ
ले ॥६३ सांतं यांतं त्रिवारं प्रणवकसहितं योऽब्रवीति प्रदोषे पश्यन्देवेशलिंगं वृषपटपणाकरः शृंगमध्ये नदृग्यां
३ ।सर्ववेदा अधीताः क्रमपदसहिता मंत्रकोटिश्च जप्तास्त्रैलोक्यं तस्य वश्यं भवति हि स विनिर्धूतपापो नव
द्ये ६४ अनेकजन्मार्जितपापराशिः संदर्शनेन त्रिपुरांतकस्य । क्षिप्रं विनश्यत्यनिलेन तूलं दहत्यथो चित्रमहोन
वद्ये ६५ शिवरहस्ये त्रिपुंड्रधारणं कृत्वा महादेवमनुस्मरन् । यो याति यत्र तत्रैव महादेवोऽधितिष्ठति ।६६ महादे
वमहादेवमहादेवेत्ययं ध्वनिः । अपमृत्युहरो नित्यं कालमृत्योश्च नाशकः ६७ महादे० ध्वनिः । संसारबीजदावाग्निः
सत्यं सत्यं न संशयः ६८ महादे० ध्वनिः । संसारसर्पदष्टानां दिव्यौषधमनुत्तमं ६९ कोटयो ब्रह्महत्यानामगम्या
गमकोटयः । सद्यः प्रलयमायांति महादेवेति कीर्तनात् ७० ब्रह्महत्यासहस्राणि पुराकृत्वापि पुल्कसः । शिवे
तिमंगलं नाम श्रुत्वा मोक्षं गतः खलु ७१ यन्नामसंकीर्तनमेकमेव विनाशयत्याशु अघौघसंघं तं देवमीशं शरणं
प्रजामि ब्रह्मेंद्रविष्ण्वादिसुरैकवंद्यं ७२ यन्नाममात्रोच्चरणेन सद्यो धन्या भवंत्येव हि मोक्षमेकं । तं देवमी
शं ०७३ यन्नामतत्वं न हि वेद वेदाद्यनंतशास्त्रैः सकलस्वरूपः । तं देवमीशं ०७४ सर्वाणि शिवनामानि मो
क्षदान्येव सर्वथा । तेषामप्युत्तमं नाम शिवेति ब्रह्मसंज्ञितं ७५ नित्यं कंठे धृतो येन शिवनाममहामणिः । ३
स नीलकंठो भूत्वांते नीलकंठे विलीयते ७६ अनेकजन्मभिर्नित्यं पुण्यं बुद्ध्या कृतं यदि । तदा शिवेति शब्दो

यं सादरं भिः सरिष्यति ७७ शिवेति नाम विमलं येनोच्चारितमादरात् । तेन भूयो न संसारसागरः समवाप्यते ७८ परं ब्रह्मे
ति विज्ञेयं शिव इत्यक्षरद्वयं । तद्ब्रह्मेति विदित्वैव तदुपास्यं मुमुक्षुभिः ७९ तदेव परमं ब्रह्म तदेवाहं वरानने । शिवनामस्व
रूपेणाव्यक्तं ब्रह्माहमेव हि ८० यदव्यक्तं परं ब्रह्म वेदांतप्रतिपादितं । तदेवाहं द्विजा नीहि शिव इत्यक्षरद्वयं ८१ इदं पत्तार
कं ब्रह्म शिवनामाभिधं शिवे । एतस्मिन्ब्रह्मणि श्रद्धानीचनामदनुग्रहं ८२ नित्यं शिवेति मंत्रेण पूजयस्व सदाशि
वे । नैतस्मादुत्तमो मंत्रः श्रेयो वेदेष्वपि ध्रुवं ८३ शिवेति यः परो मंत्रः स परं ब्रह्म उच्यते । परब्रह्मस्वरूपं तत् ज्ञातुमेव
न शक्यते ८४ तत्वं तु शिवमंत्रस्य येन ज्ञातं भविष्यति । तेन तीर्णा इति ज्ञेयो घोरः संसारसागरः ८५ शैवे कैला
ससंहितायां यत्पादपद्मस्मरणाद्यस्य नामजपादपि । न्यूनं कर्म भवेत्पूर्णं तं वंदे सांबमीश्वरं ८६ समस्तवेदवे
दांतसारसर्वं शिवप्रदं । शिवनामामृतं दिव्यं पेयं सर्वार्थसाधकं ८७ शिवनामैकसंसारमहारोगैकशामकं ।
नान्यत्संसाररोगस्य शामकं दृश्यते मया ८८ इति श्री पूर्णेंदुसरस्वतीकृतश्री शिवनामसारसंग्रहः समाप्तः ।